श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्री मेल्पत्तूर् नारायणभट्टतिरि विरचितम्

# ॥ श्रीमन्नारायणीयम् ॥

## दशक - ५६

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

---

*This was typeset using LaTeX and the Wikner font.

श्रीः
श्रीमते कृष्णाय परब्रह्मणे नमः
श्रीमते रामानुजाय नमः

# ॥ श्रीमन्नारायणीयम् ॥

## दशक - ५६

*कालियमर्दने भगवदनुग्रहवर्णनम्*

रुचिरकम्पितकुण्डलमण्डलः
सुचिरमीश ननर्तिथ पन्नगे।
अमरताडितदुन्दुभिसुन्दरं
वियति गायति दैवतयौवते॥ १ ॥

नमति यद्यदमुष्य शिरो हरे
परिविहाय तदुन्नतमुन्नतम्।
परिमथन् पदपङ्करुहा चिरं
व्यहरथाः करतालमनोहरम्॥ २ ॥

त्वदवभग्नविभुग्नफणागणे
गलितशोणितशोणितपाथसि।
फणिपतावववसीदति सन्नता-
स्तदबलास्तव माधव पादयोः॥ ३ ॥

अयि पुरैव चिराय परिश्रुत-
त्वदनुभावविलीनहृदो हि ताः।
मुनिभिरप्यनवाप्यपथैः स्तवै-
र्नुनुवुरीश भवन्तमयन्त्रितम्॥ ४ ॥

फणिवधूगणभक्तिविलोकन-
प्रविकसत्करुणाकुलचेतसा।
फणिपतिर्भवताऽच्युत जीवित-
स्त्वयि समर्पितमूर्तिरवानमत्॥ ५ ॥

www.prapatti.com

रमणकं व्रज वारिधिमध्यगं
    फणिरिपुर्न करोति विरोधिताम्।
इति भवद्वचनान्यतिमानयन्
    फणिपतिर्निरगादुरगैः समम्॥ ६ ॥

फणिवधूजनदत्तमणिव्रज-
    ज्वलितहारदुकूलविभूषितः।
तटगतैः प्रमदाश्रुविमिश्रितैः
    समगथाः स्वजनैर्दिवसावधौ॥ ७ ॥

निशि पुनस्तमसा व्रजमन्दिरं
    व्रजितुमक्षम एव जनोत्करे।
स्वपति तत्र भवच्चरणाश्रये
    दवकृशानुररुन्ध समन्ततः॥ ८ ॥

प्रबुधितानथ पालय पालये-
    त्युदयदार्तरवान् पशुपालकान्।
अवितुमाशु पपाथ महानलं
    किमिह चित्रमयं खलु ते मुखम्॥ ९ ॥

शिखिनि वर्णत एव हि पीतता
    परिलसत्यधुना क्रिययाऽप्यसौ।
इति नुतः पशुपैर्मुदितैर्विभो
    हर हरे दुरितैः सह मे गदान्॥ १० ॥

**********

www.prapatti.com